# ॥ દ્વયોપનિષત્ ॥

.. dvayopaniShat ..

sanskritdocuments.org

October 20, 2017

# .. dvayopaniShat ..

# ॥ દ્વયોપનિષત્ ॥

## Sanskrit Document Information

Text title : dvayopaniShat

File name : dvayopaniShat.itx

Category : upanishhat, vedanta

Location : doc_upanishhat

Proofread by : Sunder Hattangadi sunderh at hotmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : October 18, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

October 20, 2017

*sanskritdocuments.org*

ॐ અથાતઃ શ્રીમદ્દ્વયોત્પત્તિઃ ।
વાક્યો દ્વિતીયઃ । ષટ્પદાન્યષ્ટાદશ ।
પઞ્ચવિંશત્યક્ષરાણિ । પઞ્ચદશાક્ષરં પૂર્વમ્ ।
દશાક્ષરં પરમ્ । પૂર્વો નારાયણઃ
પ્રોક્તોઽનાદિસિદ્ધો મન્ત્રરત્નઃ સદાચાર્યમૂલઃ ।
આચાર્યો વેદસમ્પન્નો વિષ્ણુભક્તો વિમત્સરઃ ।
મન્ત્રજ્ઞો મન્ત્રભક્તશ્ચ સદામન્ત્રાશ્રયઃ શુચિઃ ॥

ગુરુભક્તિસમાયુક્તઃ પુરાણજ્ઞો વિશેષવિત્ ।
એવં લક્ષણસમ્પન્નો ગુરુરિત્યભિધીયતે ॥

આચિનોતિ હિ શાસ્ત્રાર્થાનાચારસ્થાપનાદપિ ।
સ્વયમાચરતે યસ્તુ તસ્માદાચાર્ય ઉચ્યતે ॥

ગુશબ્દસ્ત્વન્ધકારઃ સ્યાત્ રુશબ્દસ્તન્નિરોધકઃ ।
અન્ધકારનિરોધિત્વાદ્ગુરુરિત્યભિધીયતે ॥

ગુરુરેવ પરં બ્રહ્મ ગુરુરેવ પરા ગતિઃ ।
ગુરુરેવ પરં વિદ્યા ગુરુરેવ પરં ધનમ્ ॥

ગુરુરેવ પરઃ કામઃ ગુરુરેવ પરાયણઃ ।
યસ્માત્તદુપદેષ્ટાસૌ તસ્માદ્ગુરુતરો ગુરુઃ ॥

યસ્સકૃદુચ્ચારણઃ સંસારવિમોચનો ભવતિ ।
સર્વપુરુષાર્થસિદ્ધિર્ભવતિ ।
ન ચ પુનરાવર્તતે ન ચ પુનરાવર્તત ઇતિ ।
ય એવં વેદેત્યુપનિષત્ ॥

ઇતિ દ્વયોપનિષત્ સમાપ્તા ।

Proofread by Sunder Hattangadi sunderh at hotmail.com,
Radim Navyan radimnavyan at gmail.com

.. dvayopaniShat ..

Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996

on October 20, 2017

Please send corrections to *sanskrit@cheerful.com*